कुष्ठी, तैजसापहारी मण्डली, देवब्राह्मणाक्रोशकः खल्लति, गरदाग्निदावुन्मत्तौ, गुरुप्रतिहन्तापस्मारी, गोघ्नस्त्वन्धो, धर्म्मपत्नीं सुक्त्वान्यत्र प्रवृत्तः शब्दवेधी प्राणिविशेषः, कुण्डाशी भगभक्षो, देव-ब्राह्मण-स्वापहारी पाण्डुरोगी, न्यासापारी च काणः, स्त्रीपण्योपजीवी षण्ढः, कौमार-दारत्यागी दुर्भगो, मिष्टैकाशी वातगुल्मी, अभक्ष्यभक्षको-गण्डमाली, ब्राह्मणीगामी निर्वीजी, क्रूरकर्म्मा वामनो, वस्त्रापहारी पतङ्गः, शय्यापहारी क्षपणकः, शङ्खशुक्त्य-पहारी, कपाली दीपापहारी कौशिको, मित्रध्रुक् क्षयी, मातापित्रोराक्रोशकः खञ्जन" इति अन्नतवागुल्वणो, मुहुर्मुहुःसंलग्नवाक् जलोदरी, दारत्यागी कूटसाक्षी-श्लीपदी, उच्छूनजङ्घाचरणो, विवाहविघ्नकर्त्ता छिन्नोष्ठः, अवगुरणः छिन्नहस्तो, मातृघ्नोऽन्धः, स्नुषागामी, वात-वृषणः, चतुष्पथे विण्मूत्रविसर्जने मूत्रकृच्छ्री, कन्यादूषकः षण्ढः, ईर्ष्यालुर्संशकः, पित्रोर्विवदमानोऽपस्मारी,न्यासा-पहार्यनपत्यो, रत्नापहार्य्यत्यन्तदरिद्रोविद्याविक्रयी पुरुष-मृगः, वेदविक्रयी द्वीपी, बहुयाजकोजलप्लवः, अयाज्यया-जकोवराहः, अनिमन्त्रितभोजी वायसः, मिष्टैकभोजी वानरः, यतस्ततोऽश्नन्मार्जारः, कक्षवनदहनात्खद्योतः, दारकाचार्य्योमुखविगन्धिः, पर्य्युषितभोजी कृमिः, अदत्तादा-यो बलीवर्दो, मत्सरी भ्रमरः, अग्न्युत्सादी मण्डलकुष्ठी, शूद्राचार्य्यः श्वपाकः, गोहर्ता सर्पः, स्नेहापहारी क्षयी, अन्नापहार्य्यजीर्णी, ज्ञानापहारी मूर्खः, चण्डालीपुक्क-सीगमनेऽजगरः, प्रव्रजितागमने मरुपिशाचः, शूद्रागमने दीर्घकीटः, सवर्णाभिगामी दरिद्रः, जलहारी मत्स्यः, क्षीरहारी बलाका, वार्द्धुषिकोऽङ्गहीनः, अविक्रेयविक्रयी गृध्रः, राजमहिषीगामी नपुंसकः, राजाक्रोशकोगर्दभः, गोगामी मण्डूकः, अनध्यायाध्ययने शृगालः, परद्रव्याप-हारी परप्रेष्यः, मत्स्यवधे गर्भवासी" इत्येवं नानास्मृति वचनैः गतिविशेषो मिताक्षरायां दर्शितस्तेन तत्कालप-र्य्यन्तस्थायिताऽधर्म्मस्येति गम्यते। ब० अनिच्समा० अधर्म्मा । पुण्यरूपधर्म्मशून्ये त्रि० । नास्ति निवृत्तः धर्म्मो यस्य अनिच्समा० अधर्म्मा । क्षीणपुण्ये त्रि०। "तारकावर्ष-मिवाधर्मविनाशपिशुनर्मिति" काद० । गुणाद्यपरपर्य्यायः अधर्मस्तद्रहिते ब्रह्मणि न० ।

**अधर्म्मचारिन्** त्रि० न धर्मं चरति अनुतिष्ठति चर+णिनि ६त० न०त० । धर्मकृत्यानानुष्ठायिनि, पापानुष्ठायिनि च स्त्रियां ङीप् ।

**अधर्म्ममय** त्रि० अधर्मेण प्रचुरः प्राचुर्य्यार्थे मयट् । पाप-प्रचुरे । स्त्रियां ङीप् । [पापाचारिणि ।

**अधर्म्मात्मन्** त्रि० अधर्मप्रधानः आत्मा यस्य । प्राधान्येन

**अधर्म्मास्तिकाय** पु० आर्हतमतसिद्धेषु जीवादिपञ्चकास्ति-कायेषु मध्ये स्थितिस्वभावके पदार्थभेदे विवरणमर्हच्छब्दे दृश्यम् । [ङीप् ।

**अधर्म्मिन्** त्रि० अधर्मः पापमस्त्यस्य इनि । पापवति स्त्रियां

**अधर्म्मिष्ठ** त्रि० अतिशयेन अधर्म्मी इष्ठन् मत्वाट्टिलोपः । भृशपापयुक्ते ।

**अधर्म्म्य** त्रि० न धर्म्माय हितं यत् । पापापादके, "पञ्चानां तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविहेति" मनुः ।

**अधवा** स्त्री न विद्यमानो धवो भर्त्ता यस्याः । मृतभर्त्तृकायां विधवायाम् स्त्रियाम् । [भागगन्तरि त्रि० ।

**अधश्चर** पु० अधःखनित्वा चरति अच् । चौरे, अधो-

**अधश्चौर** पु० अधोभागे खनित्वा चोरयति चुर—अच् स्वार्थे अण् । सन्धिं कृत्वा चौर्य्यकारके । (सिन्धियाल) ।

**अधश्शिरस्** न० अधोवर्त्ति शिरः यस्य शत्वम् वा । अवाङ्मस्तके ।

**अधस्** अव्य० अधर+असि अधरशब्दस्थाने अधादेशश्च । पाताले, अधस्थानमात्रे च । तत्रापि अर्थवशात् प्रथमा-पञ्चमीसप्तम्यर्था उन्नेयाः । तत्र प्रथमार्थे अधोरथ्य', पञ्च-म्यर्थे अधोवृक्षात् पतति, सप्तम्यर्थे अधोगृहे शेते इत्यादि । "अधः कथञ्चिद्धृतभूमिभागमिति" कुमा० । "पतत्यधोधाम विसारि सर्व्वतः, इति माघः ।

**अधस्तन** त्रि० अधोभवः अधस्+ट्यु तुट् च । अधोभवे स्त्रियां ङीप् । "एवमागामियागीयमुख्यकालादधस्तनः स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मण इति" स्मृतिः । "अधस्तनः पूर्वतनः इत्यवच्छास्त्रेषु व्यवहार" इति न्याया-दिति" रघुनन्दनोक्तेः पूर्वतनेऽपि ।

**अधस्तरा(मा)म्** अव्य० अतिशयेन अधः, तर(म)प् आमु । अत्यन्ताधरे । द्रव्ये तु नामु । अधस्तरोदेशइत्यादि ।

**अधस्तात्** अव्य० अधर+अस्ताति अधादेशः । अधःशब्दार्थे । अयञ्च प्रथमापञ्चमीसप्तम्यर्थे एव "धर्मेण गमनमूर्द्धं गमनमधस्ताद् भवत्यधर्मेणेति" ४४ साङ्ख्यका० ।

**अधस्पदम्** न० अधोवृत्ति पदं वा सत्वम् । निम्नपदे ।

**अधामार्गव** पु० न धीयते अधाः तादृशं मार्गं वाति वा—क । अपामार्गे इति क्षीरस्वामी ।

**अधार्म्मिक** त्रि० धर्मं चरति आसेवते ठक् विरोधार्थे न०त० ।